# <u>रुक्मिणीहरणम् व्याख्या</u>

**शिवान्वितं शशिविशदोत्तमाङ्गकं**
**त्रिलोचनं परिगतशास्त्रलोचनैः।**
**निरीक्ष्य यं नियतमनुग्रहविग्रहं**
**जनो मनो हरविषयं न्यवीवृतत्॥**

अयं श्लोकः ऊनविंशशताव्दीकालीनेन वङ्गजातेन कविवरेण महामहोपाध्यायहरिदाससिद्धान्तवागीशमहोदयेन विरचितस्य "रुक्मिणीहरणम्" नामधेयस्य महाकाव्यस्य प्राथमिकः मङ्गलविधानात्मकः।

अनेन श्लोकेन विदर्भदेशस्य राज्ञः भीष्मकस्य गुणभरितं चारित्रिकवैशिष्ट्यजातम् वर्णयन्नाह कविरवः "शिवन्वितं....." इत्यादि।

जनः विदर्भदेशवासिनः शिवान्वितं [एकतः] [महादेवपक्षे] दुर्गायुक्तम् (अपरतः) [भीष्मकपक्षे] मङ्गलयुक्तं शशिविशदोक्तमाङ्गकं [एकतः] [महादेवपक्षे] चन्द्रकिरणनिर्मलमस्तकयुक्तं [अपरतः] [भीष्मकपक्षे] चन्द्र इव निर्मलम् उत्तमाङ्गयुक्तं परिगतशास्त्रलोचनैः त्रिलोचनं (एकतः) [महादेवपक्षे] त्रिलोचनयुक्तं [भीष्मकपक्षे] शास्त्रज्ञानरूपत्रिलोचनयुक्तम् (अपि च) यं भीष्मकं नियतं ध्रुवम् अनुग्रविग्रहं शान्तमूर्त्तिं निरीक्ष्य दृष्ट्वा (विदेहादिवासिनः) हरविषयं शिवसदृशं मनः मनसि न्वीवृतत् स्थिरीकुर्वन् आसीत् इत्यन्वयः।

विदर्भाधिपतिः भीष्मकः रूपेण गुणगरिम्ना च शिवतुल्यः आसीत्। स आसीत् मङ्गलयुक्तः शुभ्रचन्द्र इव निर्मलयशोविशिष्टः तथा उज्ज्वलाङ्गविशिष्टः। तस्य आसीत् वहुविधशास्त्रज्ञानभरिततृतीयनयनम्। किन्तु पार्थक्यन्तु एवम् आसीत् शिव आसीत् सदैव उग्रमूर्तिः अपरतः भीष्मकः आसीत् शान्तमूर्त्तिः स्थितधी च। अतएव राज्ञः भीष्मकस्य दर्शनं जनान् गुणगरिम्ना शिवसादृश्यं स्मारयति स्म इति भावः।

अत्र छेकवृत्त्यनुप्रासौ, व्यतिरेकालङ्कारः काव्यलिङ्गम् चेति अलङ्कारद्वयम्। द्वयोर्मेलनात् क्षीरनीरन्यायेन स्ङ्करश्चेति। रुचिरा च वृत्तम्।

**न केवलं किल कलया पृथक् पृथक्**
**दिगोश्वरा मिलितिमुपागता मिथः।**
**अवातरन्नवनिपतेः कलेवरे**
**शशास यद्दश दिश एक एव सः॥**

अयं श्लोकः ऊनविंशशताव्दीकालीनेन वङ्गजातेन कविवरेण महामहोपाध्यायहरिदाससिद्धान्तवागीशमहोदयेन विरचितस्य "रुक्मिणीहरणम्" नामधेयस्य महाकाव्यस्य प्राथमिकः मङ्गलविधानात्मकः।

अनेन श्लोकेन विदर्भराजस्य भीष्मकस्य देसोचितं चारित्रिकवैशिष्ट्यजातं वर्णयति कविवरः "न केवलम्..." इत्यादिना।

दिगीश्वराः इन्द्रवरुणयमोदयः पूर्वदक्षिणादि दिशाम् अधिदेवताः। न केवलं पृथक् पृथक् कलया अंशेन (अपि तु) मिथः परस्परं किल मिलितिं सम्मेलनं उपागताः प्राप्ताः (सन्त एव) अवनिपतेः पृथिवीपतेः तस्य भीष्मकस्य कलेवरे शरीरे अवातरण् अवतीर्णाः अभवन्। यत् यस्मात् स भीष्मकः नृपः एक एव दशदिशः पूर्वदक्षिणादयः शशास शासितवान् इत्यन्वयः।

स भीष्मकः पूर्वदक्षिणपश्चिमादि सर्वदिशाम् इन्द्रवरुणयमाकादीनाम् देवतानाम् यथा पृथग्भूतैरंशैः उत्पन्नः आसीत् तद्वत् ते देवता पूर्णभावेन परस्परं सम्मिल्य एव युगपद् एकधैव तस्य देहे आविर्भूताः वभूवुः। भीष्मकस्य सर्वदिक्षु वहुधा व्याप्तं शासनसामर्थ्यं

विलोक्यैव जना एवम् अमन्यन्त। मन्ये इतःप्राक् दिक्पालानाम् पूर्णत्वाभावे पूर्णशासनं न सम्भवति स्म इति भावः।

छेकवृत्त्यनुप्रासौ, अतिशयोक्तिरलङ्कारः, रुचिरा च वृत्तम्।